**2019 III 19** **1000** **Seat No.** | | | | | |

**Time : 2½ Hours** **SANSKRIT LANGUAGE II**

**Subject Code**

| H | 4 | 2 | 6 |
|---|---|---|---|

**Total No. of Questions : 8** **(Printed Pages : 11)** **Maximum Marks : 80**

---

**सूचना :** (*i*) प्रश्नपत्रे **चत्वारः** विभागाः सन्ति।

(*ii*) आहत्य **08** मुख्यप्रश्नाः सन्ति। सर्वे प्रश्नाः अनिवार्याः एव।

(*iii*) स्वभाषया उत्तरलेखनावसरे आङ्ग्ल, मराठी, हिन्दी, कोंकणी एतासु एका एव भाषा स्वीकर्तव्या।

(*iv*) अन्येषां सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेखनीयानि।

(*v*) नूतनप्रश्नस्य उत्तरलेखनस्य आरम्भः नूतनपृष्ठे एव करणीयः।

(*vi*) प्रश्नानाम् अङ्काः वर्णाः च स्पष्टतया लेखनीयाः।

## प्रथमखण्डः (पठितावबोधनम्)

1. (क) अधोलिखितयोः **एक**स्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत। 3

(अ) कुण्डला – सखि मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ?

मदालसा – ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

(आ) अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। एष आदेशः।

(ख) अधोलिखितं गद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।

न केवलं भास्कराचार्यः अपि तु गणितशास्त्रज्ञानामुज्ज्वलपरम्परामेव पश्यामोऽस्माकं देशे। भारतीयगणितज्ञानस्य आरम्भः द्रष्टव्यश्चेत् वेदकालपर्यन्तम् अवलोकनीयमस्माभिः। वेदेषु तात्कालिकेष्वन्येषु ग्रन्थेषु च गणितीयांशानाम् उल्लेखः विशेषो दृश्यते। बहूपयोगिनां नैकानां गणितप्रक्रियाणां जन्मभूः भारतमिति वैदेशिकैः विद्वद्वरेण्यैः मन्यते। तत्रापि अङ्कगणित-बीजगणित-भूमिति-त्रिकोणमितिक्षेत्रेषु अपूर्वाणि मूलभूतान्यनुसन्धानानि भारते प्राचीनकाल एव विहितान्यासन्।

साम्प्रतं या दशमाङ्कपद्धतिः समग्रे विश्वे प्रचलिताऽस्ति, सा नवमख्रिस्तशतकपर्यन्तम् अरबैर्युरोपीयैर्वा अज्ञाताऽसीत्। भारतेन सह वाणिज्यसम्बन्धं स्थापयद्भिः अरब्जनैरियं सुललिता पद्धतिः स्वदेशं नीता। ततो युरोपीयाः अपि आकृष्टचित्ताः इमामधिगतवन्तः। यदि भारतराष्ट्रम् एनां पद्धतिं जगते नादास्यत् तर्हि एतावती वैज्ञानिकप्रगतेः नाभविष्यदिति सुविख्यातः वैज्ञानिकमूर्धन्यः आल्बर्ट ऐन्स्टैन् अभणत्।

**प्रश्ना :**

(अ) **एक**वाक्येन उत्तरत। 3

(1) वैदेशिकैः विद्वद्वरेण्यैः किं मन्यते ?

(2) केषु क्षेत्रेषु अपूर्वाणि मूलभूतानि अनुसन्धानानि विहितानि आसन् ?

(3) आल्बर्ट ऐन्स्टैन् महोदयः दशमाङ्कपद्धतिविषये किं चिन्तयति ?

(आ) सन्धिं कृत्वा लिखत। 1

अज्ञाता + आसीत्।

(ग) अधोलिखितानि वाक्यानि कः कं प्रति वदति इति लिखत। 3

(अ) इत आयाहि किमपि कर्णे कथयिष्यामि।

(आ) ब्रह्मवादिनी भविष्यामि। आचार्येतिपदं प्राप्य शिष्येभ्यः जीवनकलां शिक्षयिष्यामि।

(इ) आर्य! गुणाः खल्वत्र।

(ई) यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि।

2. (क) अधोलिखितस्य पद्यखण्डस्य अनुवादं स्वभाषया लिखत। 4

(अ) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

(आ) पुष्पं फलं तदनु गन्धवहः समीरः

खद्योत-पङ्क्तिरमत्ता च पिकालि-गीतिः।

अद्यापि यत्र सरल-प्रकृति-प्रणीतं

पञ्चोपचारमिव पूजनमस्ति मातुः॥

(ख) अधोलिखितं पद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।

मृत्तिकया दत्तोऽयं मे देहः

प्रकाशात् प्राप्तोऽस्मि नयनदीपवर्तिके

उदकेन च विनिर्मितं तत्रास्त्रम्

वायुना चलतीदमविश्रान्तं श्वसनम्

नभसा मे प्रदत्तं तादृशं मनः

यदप्यालिङ्गेत्तन्महाकाशम् ।

**प्रश्नाः –**

(अ) **एक**वाक्येन उत्तरत। 3

(1) कया दत्तोऽयं देहः ?

(2) केन अस्त्रं विनिर्मितम् ?

(3) वायुना कीदृशं श्वसनं चलति ?

(आ) पद्यखण्डात् विलोमपदं चित्वा लिखत। 1

'तिमिरः'।

(ग) अधोलिखितश्लोकस्य अन्वयपूर्तिं कुरुत । 2

धर्मेषु सर्वेषु समत्वबुद्धिं त्वं सर्वदा धारय धर्मनिष्ठः।

मानव्यमाङ्गल्यपरा उदारा धर्मा हि सर्वे भगवत्प्रणीताः॥

**अन्वयः –**

धर्मनिष्ठः त्वं .................... सर्वेषु धर्मेषु समत्वबुद्धिं .................... ।

.................... धर्मा मानव्यमाङ्गल्यपरा .................... उदारा हि॥

3. (क) अधोलिखितेषु **त्रयाणां** प्रश्नानाम् उत्तराणि स्वभाषया लिखत। 6

(अ) गणितशास्त्रे भारतीयानां योगदानं वर्णयत।

(आ) संन्यासी दौवारिकं कथं विश्वासघातं कर्तुं प्रलोभयति ?

(इ) लक्ष्मणः किमर्थं क्रुद्धः जातः ?

(ई) मदालसा किमर्थं विवाहं कर्तुं न इच्छति ?

(ख) अधोलिखितेषु **त्रयाणां** प्रश्नानाम् उत्तराणि स्वभाषया लिखत। 6

(अ) हल्दीघाटी कीदृशी स्थली अस्ति ?

(आ) शिवराजः कथं सदाचारपरायणः अभवत् ?

(इ) दिलीपः कथं प्रजापालनं कृतवान् ?

(ई) अल्पज्ञ-पण्डितयोः कः व्यत्यासः ?

## द्वितीयखण्डः (अपठितावबोधनम्)

4. (क) अधोलिखितं परिच्छेदं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।

अथैकदा कश्चिद्राजा दण्डकारण्यं सपरिवारं मृगयार्थं अगच्छत्। वन्यसत्त्वमनुसरन् स राजा सहचरेभ्योऽमात्यादिभ्यो दूरमगच्छत्। ततस्ते सर्वे राजानमन्वेष्टुम् इतस्तोऽभ्रमन्। अरण्यमध्ये एकस्मिन्नुटजे कश्चनान्धसाधुर्न्यवसत्। राजानमन्वेष्टुं प्रधानामात्येन प्रेषितः कोऽपि सैनिकस्तत्र प्राप्तः। वृक्षतल उपविष्टमन्धसाधुं दृष्ट्वा सगर्वमब्रवीत् सः 'रे अन्ध! अप्यागतोऽस्माकं राजात्र ? इति। तदाकर्ण्य साधुरूवाच – 'अन्धोऽहम्। न द्रष्टुं समर्थोऽस्मि' इति। 'जाने

त्वमन्धोऽसि। तथापि न बधिर:। अश्वस्य पदरवोऽपि न श्रुतस्त्वया' इति उपहासेन उक्तं तेन। साधो: नेति प्रत्युत्तरं श्रुत्वा दुर्वचनानि भाषमाण: स निर्गत: तस्मात् स्थानात्।

**प्रश्ना :**

(अ) **एक**वाक्येन उत्तरत। 3

(1) वन्यसत्त्वमनुसरन् राजा केभ्य: दूरमगच्छत् ?

(2) साधु: कुत्र न्यवसत् ?

(3) प्रधानामात्येन किमर्थं सैनिक: प्रेषित: ?

(आ) सन्धिविच्छेदं कृत्वा लिखत। 1

अन्धोऽहम्।

(इ) 'सुवचनानि' इत्यस्य विलोमवाचिपदं परिच्छेदात् चित्वा लिखत। 1

(ख) अधोलिखितयो: परिच्छेदयो: **एक**स्य अनुवादं स्वभाषया लिखत। 2

(अ) अन्तरिक्षयानै: जना: आकाशे विहरन्ति। ते खगवत् स्वैरं भ्रमन्ति। प्रयत्नानाम् एव एतत् फलम्। प्रयत्नेन हि साध्यं भवति असाध्यम्। प्रयत्नेन हि अशक्ता: सशक्ता: भवन्ति।

**अथवा**

(आ) न केवलं भारते अपितु अमेरिका देशेऽपि विवेकानन्दमहोदयस्य, भाषणेन जना: प्रभाविता:। तत्रापि 'हिन्दुधर्म: श्रेष्ठ:' इति स्वमतं स: आग्रहेण प्रतिपादितवान्। हिन्दुसंस्कृते: प्रसार: इत्येव तस्य जीवितध्येयम्। तदर्थं तेन देशपर्यटनं कृतम्।

5. विषय**त्रयम्** अधिकृत्य स्वभाषया परिच्छेदान् लिखत। 9

(अ) प्रतापविजयम्

(आ) कविः बा.भ. बोरकर

(इ) डॉ. श्री. भा. वेर्णेकरः

(ई) पं. अम्बिकादत्त व्यासः।

## तृतीय खण्डः (व्याकरणम्)

6. (क) **द्वयोः** सन्धिविच्छेदं कुरुत। 2

(अ) पितरस्तासाम्

(आ) हस्तेनैव

(इ) अभवद्धर्मगुरुः।

(ख) **द्वयोः** रिक्तस्थानयोः, समस्तपदं, विग्रहवाक्यं समासनाम वा लिखत। 2

| | **समस्तपदम्** | **विग्रहवाक्यम्** | **समासनाम** |
|---|---|---|---|
| (अ) | अनवद्यानि | न अवद्यानि | .............................. |
| (आ) | भूतलदेवता | .............................. | षष्ठी तत्पुरुषः |
| (इ) | .............................. | नन्दने जायते इति | उपपद तत्पुरुषः |

(ग) अधोलिखितवाक्ययोः रेखाङ्कितपदस्थाने पर्यायपदं कोष्ठकात् चित्वा लिखत। 2

(अ) कैकय्याः <u>भर्ता</u> शक्रेण समः अस्ति। (भ्राता/पतिः)

(आ) <u>वायुः</u> वेगेन वहति। (पवनः/आयुः)

(घ) अधोलिखितपदयोः विलोमपदे कोष्ठकात् चित्वा लिखत। 2

(अ) मानम् ..................................... । (अपमानम्/सम्मानम्)

(आ) भिन्नः ..................................... । (समानः/विषमः)

(ङ) रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (**द्वयोः** एव) 2

(अ) मदालसा <u>ज्ञानस्य</u> कतिपयबिन्दून् एव प्राप्तवती।

(आ) परिचिता वा प्राप्तपरिचयपत्रा वा <u>रात्रौ</u> प्रविशन्ति।

(इ) रघुवंशिनः अन्ते <u>योगेन</u> तनुं त्यजन्ति।

7. (क) अधोलिखितवाक्येषु उचितपदरूपं कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत। (**चतुर्णाम्** एव) 4

(अ) महाराज शिववीरस्य आज्ञां ............................ शिरसा वहामः। (वयं/यूयं)

(आ) मौनम् अपण्डितानां ............................ । (कार्यम्/विभूषणम्)

(इ) अस्रधारा शतधा ............................ । (अभवत्/अभवन्)

(ई) लक्ष्म्याः रक्षार्थं ............................ सहयोगः अनिवार्यः। (पत्न्याः/पत्न्या)

(उ) ............................ अरिः प्रहरति। (शरीरात्/शरीरे)

(ख) **त्रिषु** वाक्येषु यथानिर्दिष्टं परिवर्तनं कुरुत। 3

(अ) भवान् पत्रं प्रेषयितुं गच्छतु। (बहुवचने लिखत)

(आ) सुमित्रा उत्तरं वदिष्यति। (लट्लकारे (वर्तमानकाले) लिखत)

(इ) अहं भोजनं न <u>इच्छामः</u>। (रेखाङ्कितस्थाने शुद्धपदं लिखत)

(ई) रामः त्रीणि पातकानि उक्तवान्। (प्रयोगपरिवर्तनं कुरुत)

(ग) **त्रयाणां** वाक्यानां रिक्तस्थानेषु कोष्ठके निर्दिष्टानुसारं प्रत्यय संयोज्य लिखत। 3

(अ) एषा मम .................................... पाठशाला। (प्रथम + ठक्)

(आ) .................................... सरस्वती विद्यायाः देवता अस्ति। (भगवत् + ङीप्)

(इ) ऐश्वर्यस्य आभूषणं ....................................। (सुजन + तल्)

(ई) लता मङ्गेशकरमहोदया उत्तमा .................................... अस्ति। (गायक + टाप्)

## चतुर्थखण्डः (रचनात्मकम्)

8. (क) संवादपूर्तिं कुरुत। 4

स्वाती – रमेशः पाठशालां गतवान्। अधुना सप्तम्यां कक्षायां पठति सः। सः अतीव ............................ अस्ति।

माधुरी – शोभनम्। कमला कतमस्यां कक्षायां .......................... ?

स्वाती – सा .......................... न गच्छति। .......................... वंशे कन्यानां पाठनार्थम् अनुमतिः नास्ति खलु।

माधुरी – किं कमला पाठशालां न गच्छति ? अयुक्तम् एतत्। सापि पाठयितव्या एव।

(ख) विघ्नेशः वाळपईनगरस्य स्वस्तिक विद्यालयस्य छात्रावासे निवसति। सः मडगावनगरस्थां प्राजक्ता भगिनीं प्रति स्वविद्यालयस्य क्रीडोत्सवविषयम् अधिकृत्य पत्रमेकं लिखति। पत्रे प्रेषयितुः सङ्केतः, दिनाङ्कम्, अभिवादनम्, अन्त्यभागं च लिखित्वा मध्यभागस्य रिक्तस्थानपूर्तिं कुरुत। 4

......................................

......................................

......................................

......................................

अत्र सर्वं कुशलम्। कुशलं तत्रास्तु। ह्यः अस्माकं .................................... क्रीडोत्सवः महता वैभवेन सुसम्पन्नः जातः। आरम्भे पथसञ्चलनम् आसीत्। अहं धावनक्रीडायां भागं गृहीत्वा .................................. प्राप्तवती। अस्माकं राज्यस्य क्रीडासचिवः मुख्यातिथिः ........................।

मातापितृभ्यां प्रणामाः।

......................................

......................................

(ग) मञ्जूषायां दत्तपदानां साहाय्येन संस्कृतेन चत्वारिवाक्यैः चित्रवर्णनं कुरुत। 4

**मञ्जूषा —** सहभोजनम्, फलकरण्डकः, कदलीफलानि, द्राक्षाफलानि, पात्राणि, वार्तालापः, पाकशाला, उत्पीठिका, आसन्दः, जनकः, जननी, पितामही।

